योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १९६

षण्णवत्यधिकशततमः सर्गः १९६

श्रीवाल्मीकिरुवाच ।

एवमुक्त्वा महाबुद्धे रामो राजीवलोचनः ।

मुहूर्तमात्रं विश्रम्य तूष्णीं स्थित्वा परे पदे ।। १

परमां तृप्तिमापन्नो विश्रान्तः परमात्मनि ।

मुनिं पुनरपृच्छत्तं जानन्नपि हि लीलया ।। २

श्रीराम उवाच ।

भगवन्संशयाम्भोदशरत्काल मुनीश्वर ।

इदानीं संशयोऽयं मे जातो मनसि पेलवः ।। ३

एवमेतन्महाज्ञानं संसारार्णवतारणम् ।

समस्तमेव वाग्जालं समतीत्यावतिष्ठते ।। ४

यदिदं किल सद्ब्रह्म स्वसंविन्मात्रनिश्चयम् ।

तदवाच्यं किल गिरां महतामपि मानद ।। ५

एवं स्थिते परं ज्ञेयं सर्वसंकल्पनोज्झितम् ।

स्वसंवित्तुर्यतन्मात्रलभ्यं दुर्गमतां गतम् ।। ६

प्रतियोगिव्यवच्छेदसंख्याभेदैषिणां किल ।

कथं शास्त्रपदैस्तुच्छैः सविकल्पैरवाप्यते ।। ७

विकल्पसारशब्दाद्यैर्ज्ञान शास्त्रैर्न लभ्यते ।

तत्किमर्थमनर्थाय गुरुशास्त्रादि कल्पितम् ।। ८

गुरुशास्त्रादिविज्ञाने कारणं वास्त्यकारणम् ।

तदत्र निश्चयं ब्रह्मन्ब्रूहि मे वदतां वर ।। ९

श्रीवसिष्ठ उवाच ।

एवमेतन्महाबाहो न शास्त्रं ज्ञानकारणम् ।

नानाशब्दमयं शास्त्रमनाम च परं पदम् ।। १०

तथापि राघवश्रेष्ठ यथैतद्धेतुतां गतम् ।

शास्त्राद्युत्तमबोधस्य तत्समासेन मे श्रृणु ।। ११

सन्ति क्वचिद्वैवधिकाः कीरकाश्चिरदुर्भगाः ।

दुःखेनाभ्यागताः शोषं ग्रीष्मेणेव जरद्द्रुमाः ।। १२

दारिद्र्येण दुरन्तेन कन्थासंस्थानकारिणा ।

दीनाननाशयाः पद्मा निर्गतेनेव वारिणा ।। १३

दौर्गत्यपरितप्तास्ते जीवितार्थमचिन्तयन् ।

जठरस्य कया युक्त्या वयं कुर्मः प्रपूरणम् ।। १४

इति संचिन्त्य विधिना दिनान्तेन दिनं प्रति ।

दारुभारेण जीवामो विक्रीतेनेति संस्थिताः ।। १५

इति संचिन्त्य ते जग्मुर्दार्वर्थं विपिनान्तरम् ।

ययैवाजीव्यते युक्त्या सैवापदि विराजते ।। १६

इति ते प्रत्यहं गत्वा काननं भवचारिणः ।

दारूण्यानीय विक्रीय चक्रुर्देहस्य धारणम् ।। १७

यत्प्रयान्ति वनान्तं ते तस्मिन्सन्त्यखिलानि हि ।

गुप्तागुप्तानि रत्नानि दारूणि कनकानि च ।। १८

तेषां भारभृतां मध्यात्केचित्कतिपयैर्वनात् ।

जातरूपाणि रत्नानि तानि संप्राप्नुवन्ति हि ।। १९

केचिच्चन्दनदारूणि केचित्पुष्पाणि मानद ।

केचित्फलानि विक्रीय जीवन्ति चिरकीरकाः ।। २०

केचित्सर्वमनासाद्य दुर्दारूण्येव दुर्धियः ।

नीत्वा विक्रीय जीवन्ति वनवीथ्युपजीविनः ।। २१

दार्वर्थमुद्यताः सर्वे ते संप्राप्य महावनम् ।

केचित्प्राप्य स्थिताः सर्वे झटित्येवं गतज्वरम् ।। २२

इति यावदजस्रं ते सेवन्ते तन्महावनम् ।

प्रदेशात्तावदेकस्मात्प्राप्तश्चिन्तामणिर्मणिः ।। २३

तस्माच्चिन्तामणेः प्राप्ताः समग्रा विभवश्रियः ।

परमं सुखमायातास्तत्र ते संस्थिताः सुखम् ।। २४

दार्वर्थमुद्यताः सन्तः प्राप्य सर्वार्थदं मणिम् ।

सुखं तिष्ठन्ति निर्द्वन्द्वा दिवि देववरा इव ।। २५

सर्वार्थसारपरिपूर्णतया तया ते

काष्ठोद्यमाधिगतसन्मणयो महान्तः ।

तिष्ठन्ति शान्तभयमोहविषाददुःख-

मानन्दमन्थरधियः समतामुपेताः ।। २६

इत्यार्षे श्रीवासि० वा० दे० मो० नि उ० काष्ठवैवधिकोपाख्याने चिन्तामणिलाभो नाम षष्णवत्यधिकशततमः सर्गः ।। १९६ ।।